# ભક્તશરણસ્તોત્રમ

## Bhakta Sharana Stotram

ભક્ત શરણ સ્તોત્રમ

આર્દ્રાતઃકરણસ્ત્વં યસ્માદીશાન ભક્તવૃન્દેષુ |
આર્દ્રોત્સવપ્રિયોઽતઃ શ્રીકણ્ઠાત્રાસ્તિ નૈવ સન્દેહઃ ||૧||

દ્રષ્ટુંસ્તવોત્સવસ્ય હિ લોકાન્પાપાત્તથા મૃત્યોઃ |
મા ભીરસ્ત્વિતિ શંભો મધ્યે તિર્યગ્ગતાગતૈર્બ્રૂષે ||૨||

પ્રકરોતિ કરુણયાર્દ્રાન શંભુર્નમ્રાનિતિ પ્રબોધાય |
ધર્મોઽયં કિલ લોકાનાર્દ્રાન કુરુતેઽદ્ય ગૌરીશ ||૩||

આર્દ્રાનટેશસ્ય મનોઽબ્જવૃત્તિરિત્યર્થસંબોધકૃતે જનાનામ |
આર્દ્રર્ક્ષ એવોત્સવ માહ શસ્તં પુરાણજાલં તવ પાર્વતીશ ||૪||

બાણાર્ચને ભગવતઃ પરમેશ્વરસ્ય
પ્રીતિર્ભવેન્નિરુપમેતિ યતઃ પુરાણૈઃ
સંબોધ્યતે પરશિવસ્ય તતઃ કરોતિ
બાણાર્ચનં જગતિ ભક્તિયુતા જનાલિઃ||૫||

યથાન્ધકં ત્વં વિનિહત્ય શીઘ્રં
લોકસ્ય રક્ષામકરોઃ કૃપાબ્ધે |
તથાજ્ઞતાં મે બિનિવાર્ય શીઘ્રં
વિદ્યાં પ્રયચ્છાશુ સભાધિનાથ ||૬||

ઇતિ ભક્તશરણસ્તોત્રં સંપૂર્ણમ ||

www.shaivam.org